# श्री शिव पंचाक्षरी स्तोत्रं

नागेन्द्रहाराय त्रिलोचनाय भस्माङ्गरागाय महेश्वराय |
नित्याय शुद्धाय दिगम्बराय तस्मै न काराय नम: शिवाय || १ ||

मन्दाकिनी सलिल चन्दन चर्चिताय नन्दीश्वर प्रमथनाथ महेश्वराय |
मन्दारपुष्प बहुपुष्प सुपूजिताय तस्मै म काराय नम: शिवाय || २ ||

शिवाय गौरीवदनाब्जवृन्द सूर्याय दक्षाध्वर नाशकाय |
श्री नीलकण्ठाय वृषध्वजाय तस्मै शि काराय नम: शिवाय || ३ ||

वसिष्ठकुम्भोद्भव गौतमार्य मुनीन्द्र देवार्चित शेखराय |
चन्द्रार्क वैश्वानर लोचनाय तस्मै व काराय नम: शिवाय || ४ ||

यक्षस्वरूपाय जटाधराय पिनाक हस्ताय सनातनाय |
दिव्याय देवाय दिगम्बराय तस्मै य काराय नम: शिवाय || ५ ||

पञ्चाक्षर मिदं पुण्यं य: पठेच्छिव सन्निधौ |
शिवलोक मवाप्नोति शिवेन सह मोदते || ६ ||

|| इति श्री शिव पंचाक्षरी स्तोत्रं सम्पूर्णं ||

www.viswakalyanam.org





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133